योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः १७

सप्तदशः सर्गः १७

श्रीवसिष्ठ उवाच ।

विदेहमुक्ता ये राम ते गिरामिह गोचरे ।

नैव तिष्ठन्ति तस्मात्त्वं जीवन्मुक्तिमिमां श्रृणु ।। १

प्राकृतान्येव कर्माणि यया वर्जितवाञ्छया ।

क्रियन्ते तृष्णयेमानि तां जीवन्मुक्ततां विदुः ।। २

या स्थितिस्तृष्णया जन्तोर्बाह्यार्थे बद्धभावया ।

तं बन्धमाहुराचार्याः संसारनिगडं दृढम् ।। ३

नूनमुज्झितसंकल्पा हृदि बाह्ये विहारिणी ।

वासना योदिता सेह जीवन्मुक्तशरीरिणी ।। ४

बाह्यार्थव्यसनोच्छूना तृष्णा बद्धेति राघव ।

सर्वार्थव्यसनोन्मुक्ता तृष्णा मुक्तेति कथ्यते ।। ५

पूर्वं यस्यास्तु तृष्णाया वर्तमानेऽपि शाश्वती ।

निर्दुःखता निष्कलता सा मुक्तेति बुधैः स्मृता ।। ६

इदमस्तु ममेत्यन्तर्यैषा राघव भावना ।

तां तृष्णां शृङ्खलां विद्धि कलनां च महामते ।। ७

तामेतां सर्वभावेषु सत्स्वसत्सु च सर्वदा ।

संत्यज्य परमोदारः परमेति महामनाः ।। ८

बन्धाशामथ मोक्षाशां सुखदुःखदशामपि ।

त्यक्त्वा सदसदाशां च तिष्ठाक्षुब्धमहाब्धिवत् ।। ९

अजरामरमात्मानं दृष्ट्वा बुद्धिमतां वर ।
जरामरणशङ्काभिर्मा मनः कलुषं कृथाः ।। १०
पदार्थतत्त्वं नेदं ते नायं त्वमसि राघव ।
किंचित्तदन्यदेवेदमन्य एवासि राघव ।। ११
असदभ्युदिते विश्वे सतीवासति संस्थिते ।
त्वयि तत्तामतिगते तृष्णायाः संभवः कुतः ।। १२
अन्यच्च राम मनसि पुरुषस्य विचारिणः ।
जायते निश्चयः साधो स्फाराकारश्चतुर्विधः ।। १३
आपादमस्तकमहं मातापितृविनिर्मितः ।
इत्येको निश्चयो राम बन्धायासद्विलोकनात् ।। १४
अतीतः सर्वभावेभ्यो वालाग्रादप्यहं तनुः ।
इति द्वितीयो मोक्षाय निश्चयो जायते सताम् ।। १५
जगज्जालपदार्थात्मा सर्वमेवाहमक्षयः ।
तृतीयो निश्चयश्चेत्थं मोक्षायैव रघूद्वह ।। १६
अहं जगद्वा सकलं शून्यं व्योमसमं सदा ।
एवमेष चतुर्थोऽन्यो निश्चयो मोक्षसिद्धये ।। १७
निश्चयेषु चतुर्ष्वेषु बन्धाय प्रथमः स्मृतः ।
त्रयो मोक्षाय कथिताः शुद्धभावनयोत्थिताः ।। १८
एतेषां प्रथमः प्रोक्तस्तृष्णाया बन्धयोग्यता ।
शुद्धतृष्णास्त्रयः स्वच्छा जीवन्मुक्तविलासिनः ।। १९
सर्वमात्माहमेवेति निश्चयो यो महामते ।
तमादाय विषादाय न भूयो याति मे मतिः ।। २०
तिर्यगूर्ध्वमधस्ताच्च व्यापको महिमात्मनः ।
सर्वमात्मेति तेनान्तर्निश्चयेन न बध्यते ।। २१
शून्यं तत्प्रकृतिर्माया ब्रह्मविज्ञानमित्यपि ।

शिवः पुरुष ईशानो नित्य आत्मैव कथ्यते ।। २२

सदा सर्वं सदेवेदं नेह द्वित्वान्यते क्वचित् ।

विद्योते विद्यया व्याप्तं जगन्नेतरया धिया ।। २३

आपातालमनन्तात्मा पूरितोऽम्भोधिरम्बुभिः ।

आब्रह्मस्तम्बपर्यन्तं जगदापूर्णमात्मना ।। २४

अतः सत्यमृतं नित्यं नानृतं विद्यते क्वचित् ।

वार्येव सकलाम्भोधिर्न तरङ्गादयः क्वचित् ।। २५

पृथक्कटककेयूरनूपुरादि नकाञ्चनात् ।

भिन्नास्तरुतृणाकारकोटयश्चैव नात्मनः ।। २६

द्वैताद्वैतसमुद्भेदैर्जगन्निर्माणलीलया ।

परमात्ममयी शक्तिरद्वैतैव विजृम्भते ।। २७

आत्मीये परकीये च सर्वस्मिन्नेव सर्वदा ।

नष्टे वोपचिते कार्ये सुखदुःखे गृहाण मा ।। २८

भावाद्वैतमुपाश्रित्य सत्ताद्वैतमयात्मकः ।

कर्माद्वैतमनादृत्य द्वैताद्वैतमयो भव ।। २९

भवभूमिषु भीमासु भावभावनवात्यया ।

मा पतोत्पातपूर्णासु दरीष्वन्तः करी यथा ।। ३०

द्वैतं न संभवति चित्तमयं महात्म-

न्नात्मन्यथैक्यमपि न द्वितयोदितात्म ।

अद्वैतमैक्यरहितं सततोदितं स-

त्सर्वं न किंचिदपि चाहुरतः स्वरूपम् ।।३१

नैवाहमस्ति नच नाम जगन्ति सन्ति

सर्वं च विद्यत इदं ननु निर्विकारम् ।

विज्ञानमात्रमवभासत एव शान्तं

नासन्न सज्जगदिदं च सदेति विद्धि ।। ३२

परममृतमनाद्यं भासनं सर्वभासा-

मजरमजमचिन्त्यं निष्कलं निर्विकारम् ।

विगतकरणजालं जीवनं जीवशक्तेः

सकलकलनहीनं कारणं कारणानाम् ।। ३३

सततमुदितमीशं व्यातते चित्प्रकाशे

स्थितमनुभवबीजं स्वात्मभावोपदेश्यम् ।

स्वदनमनुचितोऽन्तर्ब्रह्म सर्वं सदैव

त्वमहमपि जगच्चेत्यस्तुते निश्चयोन्तः ।।३४

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपाये उपशमप्रकरणे तृष्णाविच्छेदोपदेशो नाम सप्तदशः सर्गः ।। १७ ।।